## ४९. यात्राचिटिकारक्षणम्

अस्/नी/लोट्

प्रबन्धकः - महेश ! अद्य आरक्षणार्थं रेलयाननिस्थानकं गच्छतु । द्वयोः हरिद्वारगमनाय यात्राचिटिकाम् आनयतु ।

महेशः - आर्य ! अद्य मया सह बालाचार्यः अपि आगच्छति । आवां ततः शिवाजीनगरं गच्छावः ।

प्रबन्धकः - अद्य कार्यालयकार्यं नास्ति वा ? कदा आगच्छतः ?

महेशः - रात्रौ आगच्छावः ।

प्रबन्धकः - शिवाजीनगरे कः अस्ति ? बालाचार्यं किमर्थं नयति ?

महेशः - शिवाजीनगरे मम भगिनी अस्ति। मम भगिनी बालाचार्यस्यापि बन्धुः । अतः सा उक्तवती - बालाचार्यमपि आनयतु इति । अतः तत्र गच्छावः ।

प्रबन्धकः - तत्र कोऽपि विशेषः अस्ति किम् ?

महेशः - मम आवुत्तस्य किञ्चित् 'अस्वास्थ्यम् ' इति । अतः तत्र गत्वा तं दृष्ट्वा आगच्छावः ।

प्रबन्धकः - भवतु, कार्यविषये चिन्तयताम् । शीघ्रं गत्वा आगच्छताम् ।